किंनिमित्तं वसति, केन निमित्तेन वसति, कस्मै निमित्ताय वसति, कस्मान्निमित्ताद् वसति, कस्य निमित्तस्य वसति, कस्मिन् निमित्ते वसति। एवं कारणहेत्वोरप्युदाहार्यम्।

अर्थग्रहणं चैतत्। [1]पर्यायोपादानं तु [2]स्वरूपविधिर्मा विज्ञायि इति। तेनेहापि भवति––किं प्रयोजनं वसति, [3]केन प्रयोजनेन वसति, कस्मै प्रयोजनाय वसति, कस्मात् प्रयोजनाद् वसति, कस्य प्रयोजनस्य वसति, कस्मिन् प्रयोजने वसति॥

## अपादाने पञ्चमी। (२८/५८७)

अपादाने कारके पञ्चमी विभक्तिर्भवति। ग्रामादागच्छति। [4]पर्वतादवरोहति। वृकेभ्यो बिभेति। अध्ययनात् पराजयते[5]।

[१२७] पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसङ्ख्यानम्। (म.भा. १.४५५)

प्रासादमा[6]रुह्य प्रेक्षते, प्रासादात् प्रेक्षते।

[१२८] अधिकरणे चोपसङ्ख्यानम्। (म.भा. १.४५५)

आसने उपविश्य प्रेक्षते, आसनात् प्रेक्षते। [7]शयनात् प्रेक्षते।

[१२९] प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या। (म.भा. १.४५५)

कुतो भवान्? पाटलिपुत्रात्[8]।

[१३०] यतश्चाध्वकालनिर्माणं [9]तत्र पञ्चमी वक्तव्या। (म.भा. १.४५५)

[10]गवीधुमतः साङ्काश्यं चत्वारि योजनानि। कार्तिक्या आग्रहायणी मासे।

[१३१] [11]तद्युक्तात् काले सप्तमी [12]वक्तव्या। (म.भा. १.४५५)

कार्तिक्या आग्रहायणी मासे।

[१३२] अध्वनः प्रथमा सप्तमी च [13]वक्तव्या। (म.भा. १.४५५)

[14]गवीधुमतः साङ्काश्यं चत्वारि योजनानि, चतुर्षु योजनेषु [15]वा॥

## अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। (२९/५९५)

अन्य आरात् इतर ऋते दिक्शब्द अञ्चूत्तरपद आच् आहि इत्येतै[16]र्योगे पञ्चमी विभक्तिर्भवति। अन्य इत्यर्थग्रहणम्। तेन पर्यायप्रयोगेऽपि भवति। अन्यो[17]देवदत्तात्। भिन्नो [18]देवदत्तात्। अर्थान्तरं देवदत्तात्।

---

1. पर्यायोपादानः ह. 2. स्वरूपविधिना विज्ञायि क. 3. केन – प्रयोजने वसति नास्ति इ. 4. उदाहरणमिदं नास्ति ग.ङ. 5. यवेभ्यो गाः वारयति। उपाध्यायादधीते। शृङ्गाच्छरो जायते। हिमवतो गंगा प्रभवति इत्यधिकम् ह, सार्थाद्धीनः इत्यधिकम् क.ङ.ह, रथात् पतति इत्यधिकम् ङ.फ. 6. अधिकृत्य ङ. 7. उदाहरणमिदं नास्ति फ. 8. अहं आयातः इत्यधिकम् ग. 9. ततः ङ. 10. गवां धुमतः ङ. 11. वार्त्तिकमिदं नास्ति फ. 12. च वाच्या इ. 13. वाच्या इ. 14. गवां ङ, गवेधुमतः ब. 15. वा नास्ति ङ. 16. युक्ते क.इ.फ. 17–18. यज्ञदत्तात् क. ङ.